# Parabrahma Upanishad

# પરબ્રહ્મોપનિષત્

## Document Information

Text title : Prabrahma Upanishad

File name : parabrahma.itx

Category : upanishhat, svara

Location : doc_upanishhat

Author : Vedic tradition

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : 78 / 108; Atharva Veda - Sanyasa upanishad

Latest update : August 12, 2000

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# પરબ્રહ્મોપનિષત્

પરબ્રહ્મોપનિષદિ વેદ્યાખણ્ડસુખાકૃતિ ।
પરિવ્રાજકહૃદ્વેયં પરિતસ્ત્રૈપદં ભજે ॥

ૐ ભદ્રં કર્ણેભિઃ શ‍ૃણુયામ દેવાઃ ॥ ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ॥

સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાँ સસ્તનૂભિઃ ॥ વ્યશેમ દેવહિતં યદાયુઃ ॥

સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ ॥ સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ॥

સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ ॥ સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

હરિઃ ૐ ॥ અથ હૈનં મહાશાલઃ શૌનકોઽઙ્ગિરસં ભગવન્તં પિપ્પલાદં વિધિવદુપસન્નઃ પપ્રચ્છ દિવ્યે બ્રહ્મપુરે કે સમ્પ્રતિષ્ઠિતા ભવન્તિ । કથં સૃજ્યન્તે । નિત્યાત્મન એષ મહિમા । વિભજ્ય એષ મહિમા વિભુઃ । ક એષઃ । તસ્મૈ સ હોવાચ । એતત્સત્યં યત્પ્રબ્રવીમિ બ્રહ્મવિદ્યાં વરિષ્ઠાં દેવેભ્યઃ પ્રાણેભ્યઃ । પરબ્રહ્મપુરે વિરજં નિષ્કલં શુભમક્ષરં વિરજં વિભાતિ । સ નિયચ્છતિ મધુકરઃ શ્યેવ વિકર્મકઃ । અકર્મા સ્વામીવ સ્થિતઃ । કર્મતરઃ કર્ષકવત્ફલમનુભવતિ । કર્મમર્મજ્ઞાતા કર્મ કરોતિ । કર્મમર્મ જ્ઞાત્વા કર્મ કુર્યાત્ । કો જાલં વિક્ષિપેદેકો નૈનમપકર્ષત્યપકર્ષતિ । પ્રાણદેવા-શ્ચત્વારઃ । તાઃ સર્વા નાડ્યઃ સુષુપ્તશ્યેનાકાશવત્ । યથા શ્યેનઃ ખમાશ્રિત્ય યાતિ સ્વમાલયં કુલાયમ્ । એવં સુષુપ્તં બ્રૂત । અયં ચ પરશ્ચ સ સર્વત્ર હિરણ્મયે પરે કોશે । અમૃતા હ્યેષા નાડી ત્રયં સંચરતિ । તસ્ય ત્રિપાદં બ્રહ્મ । એષાત્રેષ્ય તતોઽનુતિષ્ઠતિ । અન્યત્ર બ્રૂત । અયં ચ પરં ચ સર્વત્ર હિરણ્મયે કોશે ।
યથૈષ દેવદત્તો યષ્ટ્યા ચ તાડ્યમાનો નૈવૈતિ ।
એવમિષ્ટાપૂર્તકર્મશુભાશુભૈર્ન લિપ્યતે । યથા
કુમારકો નિષ્કામ આનન્દમભિયાતિ । તથૈષ દેવઃ

સ્વપ્ન આનન્દમભિયાતિ વેદ એવ પરં જ્યોતિઃ । જ્યોતિષામા
જ્યોતિરાનન્દયત્યેવમેવ । તત્પરં યચ્ચિત્તં પરમાત્માન-
માનન્દયતિ । શુભ્રવર્ણમાજાયતેશ્વરાત્ । ભૂયસ્તેનૈવ
માર્ગેણ સ્વપ્નસ્થાનં નિયચ્છતિ । જલૂકાભાવવદ્યથા-
કામમાજાયતેશ્વરાત્ । તાવતાત્માનમાનન્દયતિ । પરસન્ધિ
યદપરસન્ધીતિ । તત્પરં નાપરં ત્યજતિ । તદૈવ કપાલષ્ટકં
સન્ધાય ય એષ સ્તન ઇવાવલમ્બતે સેન્દ્રયોનિઃ સ વેદયોનિરિતિ ।
અત્ર જાગ્રતિ । શુભાશુભાતિરિક્તઃ શુભાશુભૈરપિ કર્મભિર્ન લિપ્યતે ।
ય એષ દેવોઽન્યદેવાસ્ય સમ્પ્રસાદોઽન્તર્યામ્યસઙ્ગચિદ્રૂપઃ
પુરુષઃ । પ્રણવહંસઃ પરં બ્રહ્મ । ન પ્રાણહંસઃ । પ્રણવો
જીવઃ । આદ્યા દેવતા નિવેદયતિ । ય એવં વેદ । તત્કથં નિવેદયતે ।
જીવસ્ય બ્રહ્મત્વમાપાદયતિ । સત્ત્વમથાસ્ય પુરુષસ્યાન્તઃ
શિખોપવીતત્વં બ્રાહ્મણસ્ય । મુમુક્ષોરન્તઃ શિખોપવીતધારણમ્ ।
બહિર્લક્ષ્યમાણશિખાયજ્ઞોપવીતધારણં કર્મિણો ગૃહસ્થસ્ય ।
અન્તરુપવીતલક્ષણં તુ બહિસ્તન્તુવદવ્યક્તમન્તસ્તત્ત્વમેલનમ્ ।
ન સન્નાસન્ન સદસદ્ભિન્નાભિન્નં ન ચોભયમ્ । ન સભાગં
ન નિર્ભાગં ન ચાપ્યુભયરૂપકમ્ ॥

બ્રહ્માત્મૈકત્વવિજ્ઞાનં હેયં મિથ્યત્વકારણાદિતિ ।
પઞ્ચપાદ્બ્રહ્મણો ન કિંચન । ચતુષ્પાદન્તર્વર્તિનોઽન્ત-
ર્જીવબ્રહ્મણશ્ચત્વારિ સ્થાનાનિ । નાભિહૃદયકણ્ઠમૂર્ધસુ
જાગ્રત્સ્વપ્નસુષુપ્તિતુરીયાવસ્થાઃ । આહવનીયગાર્હપત્ય-
દક્ષિણસભ્યાગ્નિષુ । જાગરિતે બ્રહ્મા સ્વપ્ને વિષ્ણુઃ
સુષુપ્તૌ રુદ્રસ્તુરીયમક્ષરં ચિન્મયમ્ । તસ્માચ્ચતુરવસ્થા ।
ચતુરઙ્ગુલવેષ્ટનમિવ ષણ્ણવતિતત્ત્વાનિ તન્તુવદ્વિભજ્ય તદા
હિતં ત્રિગુણીકૃત્ય દ્વાત્રિંશત્તત્ત્વનિષ્કર્ષમાપાદ્ય
જ્ઞાનપૂતં ત્રિગુણસ્વરૂપં ત્રિમૂર્તિત્વં પૃથગ્વિજ્ઞાય
નવબ્રહ્માખ્યનવગુણોપેતં જ્ઞાત્વા નવમાનમિતસ્ત્રિગુણીકૃત્ય
સૂર્યેન્દ્વગ્નિકલાસ્વરૂપત્વેનૈકીકૃત્યાદ્યન્તરેકત્વમપિ મધ્યે
ત્રિરાવૃત્ય બ્રહ્મવિષ્ણુમહેશ્વરત્વમનુસંધાયાદ્યન્તમેકીકૃત્ય
ચિદ્ગ્રન્થાવદ્વૈતગ્રન્થિં કૃત્વા નાભ્યાદિબ્રહ્મબિલપ્રમાણં
પૃથક્ પૃથક્ સપ્તવિંશતિતત્ત્વસંબન્ધં ત્રિગુણોપેતં

ત્રિમૂર્તિલક્ષણલક્ષિતમપ્યેકત્વમાપાદ્ય વામાંસાદિદક્ષિણકણ્ઠ્યન્તં
વિભાવ્યાદ્યન્તગ્રહસંમેલનમેકં જ્ઞાત્વા મૂલમેકં સત્યં
મૃણ્મયં વિજ્ઞાતં સ્યાદ્વાચારમ્ભણં વિકારો નામધેયં મૃત્તિકેત્યેવ સત્યમ્ ।
હંસેતિ વર્ણદ્વયેનાન્તઃ શિખોપવીતિત્વં નિશ્ચિત્ય બ્રાહ્મણત્વં બ્રહ્મધ્યાનાર્હત્વં
યતિત્વમલક્ષિતાન્તઃશિખોપવીતિત્વમેવં બહિર્લક્ષિતકર્મશિખા જ્ઞાનોપવીતં
ગૃહસ્થસ્યાભાસબ્રહ્મણત્વસ્ય કેશસમૂહશિખાપ્રત્યક્ષકાર્પાસતન્તુ-
કૃતોપવીતત્વં ચતુર્ગુણીકૃત્ય ચતુર્વિંશતિતત્ત્વાપાદનતન્તુકૃત્ત્વં
નવતત્ત્વમેકમેવ ॥ પરંબ્રહ્મ તત્પ્રતિસરયોગ્યત્વાદ્બહુમાર્ગપ્રવૃત્તિં
કલ્પયન્તિ । સર્વેષાં બ્રહ્માદીનાં દેવર્ષીણાં મનુષ્યાણાં મૂર્તિરેકા ।
બ્રહ્મૈકમેવ । બ્રાહ્મણત્વમેકમેવ । વર્ણાશ્રમાચારવિશેષાઃ પૃથક્પૃથક્
શિખાવર્ણાશ્રમિણામેકકૈવ । અપવર્ગસ્ય યતેઃ શિખાયજ્ઞોપવીતમૂલં
પ્રણવમેકમેવ વદન્તિ । હંસઃ શિખા । પ્રણવ ઉપવીતમ્ । નાદઃ સંધાનમ્ ।
એષ ધર્મો નેતરો ધર્મઃ । તત્કથમિતિ । પ્રણવહંસો નાદસ્ત્રિવૃત્સૂત્રં
સ્વહૃદિ ચૈતન્યે તિષ્ઠતિ ત્રિવિધં બ્રહ્મ । તદ્વિદ્ધિ પ્રાપઞ્ચિકશિખોપવીતં ત્યજેત્ ।
સશિખં વપનં કૃત્વા બહિઃસૂત્રં ત્યજેદ્બુધઃ ।
યદક્ષરં પરંબ્રહ્મ તત્સૂત્રમિતિ ધારયેત્ ॥ ૧॥

પુનર્જન્મનિવૃત્યર્થં મોક્ષસ્યાહર્નિશં સ્મરેત્ ।
સૂચનાત્સૂત્રમિત્યુક્તં સૂત્રં નામ પરં પદમ્ ॥ ૨॥

તત્સૂત્રં વિદિતં યેન સ મુમુક્ષુઃ સ ભિક્ષુકઃ ।
સ વેદવિત્સદાચારઃ સ વિપ્રઃ પઙ્ક્તિપાવનઃ ॥ ૩॥

યેન સર્વમિદં પ્રોતં સૂત્રે મણિગણા ઇવ ।
તત્સૂત્રં ધારયેદ્યોગી યોગવિદ્બ્રાહ્મણો યતિઃ ॥ ૪॥

બહિઃસૂત્રં ત્યજેદ્વિપ્રો યોગવિજ્ઞાનતત્પરઃ ।
બ્રહ્મભાવમિદં સૂત્રં ધારયેદ્યઃ સ મુક્તિભાક્ ॥ ૫॥

નાશુચિત્વં ન ચોચ્છિષ્ટં તસ્ય સૂત્રસ્ય ધારણાત્ ।
સૂત્રમન્તર્ગતં યેષાં જ્ઞાનયજ્ઞોપવીતિનામ્ ॥ ૬॥

યે તુ સૂત્રવિદો લોકે તે ચ યજ્ઞોપવીતિનઃ ।
જ્ઞાનશિખિનો જ્ઞાનનિષ્ઠા જ્ઞાનયજ્ઞોપવીતિનઃ ।
જ્ઞાનમેવ પરં તેષાં પવિત્રં જ્ઞાનમીરિતમ્ ॥ ૭॥

અગ્નેરિવ શિખા નાન્યા યસ્ય જ્ઞાનમયી શિખા ।

સ શિખીત્યુચ્યતે વિદ્વાન્નેતરે કેશધારિણઃ ॥ ૮॥

કર્મણ્યધિકૃતઃ યે તુ વૈદિકે લૌકિકેઽપિ વા ।
બ્રાહ્મણાભાસમાત્રેણ જીવન્તે કુક્ષિપૂરકાઃ ।
વ્રજન્તે નિરયં તે તુ પુનર્જન્મનિ જન્મનિ ॥ ૯॥

વામાંસદક્ષકણ્ઠ્યન્તં બ્રહ્મસૂત્રં તુ સવ્યતઃ ।
અન્તર્બહિરિવાત્યર્થં તત્ત્વતન્તુસમન્વિતમ્ ॥ ૧૦॥

નાભ્યાદિબ્રહ્મરન્ધ્રાન્તપ્રમાણં ધારયેત્સુધીઃ ।
તેભિર્ધાર્યમિદં સૂત્રં ક્રિયાઙ્ગં તન્તુનિર્મિતમ્ ॥ ૧૧॥

શિખા જ્ઞાનમયી યસ્ય ઉપવીતં ચ તન્મયમ્ ।
બ્રાહ્મણ્યં સકલં તસ્ય નેતરેષાં તુ કિંચન ॥ ૧૨॥

ઇદં યજ્ઞોપવીતં તુ પરમં યત્પરાયણમ્ ।
વિદ્વાન્યજ્ઞોપવીતી સંધારયેદ્યઃ સ મુક્તિભાક્ ॥ ૧૩॥

બહિરન્તશ્ચોપવીતી વિપ્રઃ સંન્યસ્તુમર્હતિ ।
એકયજ્ઞોપવીતી તુ નૈવ સંન્યસ્તુમર્હતિ ॥ ૧૪॥

તસ્માત્સર્વપ્રયત્નેન મોક્ષાપેક્ષી ભવેદ્યતિઃ ।
બહિઃસૂત્રં પરિત્યજ્ય સ્વાન્તઃસૂત્રં તુ ધારયેત્ ॥ ૧૫॥

બહિઃપ્રપઞ્ચશિખોપવીતિત્વમનાદૃત્ય પ્રણવહંસશિખોપવીતિત્વમવલમ્બ્ય
મોક્ષસાધનં કુર્યાદિત્યાહ ભગવાઞ્છૌનક ઇત્યુપનિષત્ ॥

ૐ ભદ્રં કર્ણેભિઃ શ‍ૃણુયામ દેવાઃ ॥ ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ॥

સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાઁ સસ્તનૂભિઃ ॥ વ્યશેમ દેવહિતં યદાયુઃ ॥

સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ ॥ સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ॥

સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ ॥ સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥ હરિઃ ૐ તત્સત્ ॥

ઇતિ પરબ્રહ્મોપનિષત્સમાપ્તા ॥

Encoded by Sunder Hattangadi

*Parabrahma Upanishad*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*